M - 2178 228
Checked 2012
कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र. M 2178 228 विषय वैदिक
नाव
लेखक / लिपीकार
पृष्ठ 20 काळ
पूर्ण / अपूर्ण
865
8417 - M

॥ अथ कूष्मांडहोमः ॥ गणहोमप्रारंभः ॥

श्रीगणेशाय नमः ॥ श्री कुलदेवतायै नमः ॥ अथ कूश्माण्डहोमः ॥ ॐ म्र ॥ ॥
कूश्माण्डैर्जुहुयाद्यो पूत इव मन्येत यथा स्तेनो यथा भ्रुणहैवमेष भवति
यो योनौ रेतः सिंचति यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यते
इत्ययोनौ वा रेतः सिक्तान्यत्र स्वप्नादिरेतो वा पवित्रकामो मावास्यायां पौ
र्णमास्यां वा केशश्मश्रुलोमनखानि वापयित्वा ब्रह्मचारिकल्पेन व्रत
मुपैति संवत्सरं मासं चतुर्विंशत्यह द्वादशरात्रीः षड्तिस्रो वा नमांसं
समश्नीयान्न स्त्रियमुपेयान्नोपर्यासीत जुगुप्सेतानृतात्पयो [illegible] भक्ष
यतीति प्रथमकल्पो यावकं वोपयुंजानः कृच्छ्रं द्वादशरात्रं वा व्रतं चरेद्भि
क्षेद्वा तद्विधेषु यवागूं राजन्यो वैश्य आमिक्षां स पूर्वाण्हे पाकयज्ञिके
धर्मेणाग्निमुपसमाधाय संपरिस्तीर्याग्निमुखान्कृत्वा थाज्याहुती रूपजु
होति ॥ यद्देवा देवहेडनं यद्दीव्यन्नृणमहं मायुष्टे विश्वे तो दधदित्येतैस्त्रि

१ त॰

भिरनुवाकैः प्रत्यृचमाज्यस्य जुहुयात् ॥ सिꣳहे व्याघ्र उत या पृदाकावि
तिश्च स्त्वः स्रुवाहुतीरभ्यावर्तिन्नग्ने अंगिरः पुनरूर्जा सह रय्येति
च तस्रो भ्यावर्तिनीर्हुत्वा समित्पाणिर्यजमानलोके वसच्छाय वैश्वान
राय प्रतिवेदयाम इति द्वादशर्चेन सूक्तेनोपतिष्ठते ॥ यन्मया मन
सा वाचा कृतमेनः कदाचन ॥ सर्वस्मात्तस्मान्मेक्षितो मोग्धि त्वꣳहि
वेत्थ यथातथꣳ स्वाहेति समिधमाधाय वरं ददाति ॥ येनेमभूति
सिद्धमाधेनुवरप्रदानादेकेवाभोपरिचर्याथाग्न्याधेयं यद्देवादेवहे
डनं यद्दीव्यं नृणमहमायुष्टे विश्वतोदधदिति पूर्णाहुतिꣳ हुत्वाग्नि
होत्रमारप्स्यमानो दर्शहोत्रा हुत्वा दर्शपूर्णमासावारप्स्यमानः चतु
र्होत्रा हुत्वा चातुर्मास्यान्यारप्स्यमानैः पंचहोत्रा हुत्वा पशुबंधे षड्ढोत्रा
सोमे सप्तहोत्र विज्ञायते च कर्मादिष्वेतैर्जुहुयात् पूतो देवलोकान्सम १

श्नुत इति हि ब्राह्मणमिति हि ब्राह्मणम् ॥ तस्य प्रयोगः ॥ कस्यांचिदमा
वास्यायां पौर्णमास्यां वा कृतप्रातः क्रियः औपासनाग्नेः पश्चाद्दर्भेष्वा
सीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य देशकालौ संकीर्त्य ॥
मम सपत्नीकस्य ... नोनिर्बर्हणार्थं संवत्सरं मासं चतुर्विंशतिरात्रं द्वा
दशरात्रं षड्रात्रं त्रिरात्रं वा कूश्माण्डैर्होष्यामि ॥ गणेशं संपूज्य पुण्याहं वा
चयेत् ॥ तत्र आदित्यादयः प्रीयंतामिति विशेषः ॥ ततः केशश्मश्रूपपक्ष
नखानि वापयित्वा पत्नी व्यार्चारा द्विरुद्धं ॥ स्नात्वाहते वाससी परिध्याते ॥
ततः औपासनाग्नेः पश्चादुपविश्याग्निमुपसमाधाय देवतापरिग्रहार्थम
न्वाधानं कुर्यात् ॥ अत्र एहीत्यादि प्राणायामांते कूश्माण्डहोमकर्मणि या
यक्ष्यमाणा देवतास्तास्सर्वाः परिगृहीष्यामि ॥ व्याहृतिपर्यंतमुक्तावैत्रो
षिकप्रधानहोमे देवानादित्यान्॰ विश्वान्देवान्॰ द्यावापृथिव्यौ सरस्व

बृ॰ हो॰
२

स्वतीं॰ इंद्राग्नीमित्रावरुणौसोमंधातारंबृहस्पतिं॰ जातवेदसं॰ अग्निंगार्हपत्यं॰ ज्योतिः॰ अग्निं
अग्निंगार्हपत्यंद्विः॰ अग्निं॰ अग्निंगार्हपत्यंद्विः॰ अग्निः॰ अग्निंगार्हपत्यं॰ अपःशुंधनीः॰
आपोहिरण्यवर्णाः॰ वरुणंद्विः॰ अग्नीवरुणौद्विः॰ अग्निमयसं॰ अग्नेद्वे॰ उग्रंप
श्यापुराष्ट्रभृतमप्सरसौ॰ उग्रंपश्यापुराष्ट्रभृतंच॰ वरुणंचतुः॰ अग्नीवरुणौद्विः॰
संकुसुकंविकुसुकंनिर्ऋथंनिःस्वनंच॰ हस्रांनिर्ऋतिं॰ दुःशापुंसाभुशापुंसोघण
मनुघणंच॰ त्वष्टारं॰ आयुष्मग्निं॰ आयुर्दामग्निं॰ अग्निंवरुणमदितिंविश्वान्देवा
न्॰ अग्निंपवमानंत्रिः॰ अग्निंजातवेदसं॰ जातवेदसं॰ अग्निंरक्षोहणं॰ अग्निं॰ उप
संनिम्रुचंच॰ देवान्जातवेदसमग्निं॰ अग्निं॰ अग्निं॰ ब्रह्माणं॰ वैश्वानरं॰ शिपिविष्ट
चतुः॰ अग्निमभ्यावर्तिनंचतुः॰ अग्निंवैश्वानरंसमिधो॰ अंगहोमेवरुणाभि

श्री॰
२

यादिव्याहृतिपर्यंतंकृत्वास्रुवाहुतीर्जुहोति॥ ॐ म॥ यद्देवादेवहेड
नंदेवासश्चकृमावयं॥ आदित्यास्तस्मान्मामुंचतर्तस्यर्तेनमामितः
स्वाहा॥ देवेभ्यआदित्येभ्यइदं॥१॥ देवाजीवनकाम्यायद्वाचानृ
तमूदिम॥ तस्मान्नइहमुंचतविश्वेदेवाःसजोषसःस्वाहा॥ विश्वेभ्यो
देवेभ्यइदं॥२॥ ऋतेनद्यावापृथिवीऋतेनत्वंसरस्वति॥ कृतानः
पाह्येनसोयत्किंचानृतमूदिमःस्वाहा॥ द्यावापृथिवीभ्यांसरस्व
त्यैचेदं॥३॥ इंद्राग्नीमित्रावरुणौसोमोधाताबृहस्पतिः॥ तेनोमुं
चंत्वेनसोयदन्यकृतमारिमःस्वाहा॥ इंद्राग्निभ्यांमित्रावरुणा
भ्यांसोमायधात्रेबृहस्पतयेचेदं॥४॥ सजातशंसादुतजामिशंसा
ज्ज्यायसःशंसादुतवाकनीयसः॥ अनाधृष्टंदेवकृतंयदेनः

२

स्तास्मात्वमस्मा जातवेदो मुमुग्धि स्वाहा ॥ जातवेदस इदं ॥५॥ यद्वाचा
यन्मनसा बाहुभ्यामुरुभ्यामष्ठीवद्भ्यां शिश्नैर्यदनृतं चकृमा वयं ॥
अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंचतु चकृम यानि दुष्कृता स्वा
॥६॥ हा ॥ अग्नये गार्हपत्यायेदं ॥ येन त्रितो अर्णवान्निर्बभूव येन सूर्यं
तमसो निर्मुमोच ॥ येनेंद्रो विश्वा अजहादरातीस्तेनाहं ज्योतिषा
ज्योतिरानशान आक्षि स्वाहा ॥ ज्योतिष इदं ॥७॥ यत्कुसीदमप्र
तीत्तं मयेह येन यमस्य निधिना चरामि ॥ एतत्तदग्ने अनृणो भवा
मि जीवन्नेव प्रति तत्ते दधामि स्वाहा ॥ अग्नय इदं ॥८॥ यन्मयि मा
ता गर्भे सत्येनश्चकार यत्पिता ॥ अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुं
चतु दुरितो यानि चकृम करोतु मामनेनसं स्वाहा ॥ अग्नये गार्हप
त्यायेदं ॥९॥ यदापिपेष मातरं पितरं पुत्रः प्रमुदितो धयन् ॥ अहिंसि ३

तो पितरो मया तत्तदग्ने अनृणो भवामि स्वाहा ॥ अग्नय इदं ॥१०॥
यदंतरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिंसिम ॥ अग्निर्मा त०
सं स्वाहा ॥ अग्नये गार्हपत्यायेदं ॥११॥ यदाशसा निःशसा यत्पराश
साय देनश्चकृमा नूतनं यत्पुराणं ॥ अग्निर्मा त० सं स्वाहा ॥ अग्नये
गार्हपत्यायेदं ॥१२॥ अतिक्रामामि दुरितं यदेनो जहामि रिप्रं परमे स
धस्थे ॥ यत्र यंति सुकृतो नापि दुष्कृतस्तमारोहामि सुकृतां नु लोकं
स्वाहा ॥ अग्नय इदं ॥१३॥ त्रिते देवा अमृजतैतदेनस्त्रित एतन्मनु
ष्येषु मामृजे ॥ ततो मा यदि किंचिदानशेऽग्निर्मा तस्मादे० सं स्वाहा ॥
अग्नये गार्हपत्यायेदं ॥१४॥ दिवि जाता अप्सु जाता या जाता ओषधी
भ्यः ॥ अथो या अग्निजा आपस्ता नः शुंधंतु शुंधनी स्वाहा ॥ अध्वशुं

४

धनेभ्य इदं॥१५॥ यदापो नक्तं दुरितं चराम यद्वा दिवा नूतनं यत्पुराणं॥
हिरण्यवर्णास्ततउत्पुनीतनः स्वाहा॥ अद्भ्यो हिरण्यवर्णाभ्य इदं॥१६॥
इमं मे वरुण श्रुधी हवमद्या च मृडय॥ त्वामवस्युराचके स्वाहा॥ वरुणा
येदं॥१७॥ तत्वा यामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हवि
र्भिः॥ अहेडमानो वरुणेह बोध्युरुशंस मान आयुः प्रमोषीः स्वाहा॥
वरुणायेदं॥१८॥ त्वंनो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसी
ष्ठाः॥ यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्स्वा
हा॥ अग्नीवरुणाभ्यामिदं॥१९॥ स त्वन्नो अग्ने वमो [illegible] भवोती नेदि
ष्ठो अस्या उषसो व्युष्टौ॥ अवयक्ष्व नो वरुणं रराणो वीहि मृडीकं
सुहवो न एधि स्वाहा॥ अग्नीवरुणाभ्यामिदं॥२०॥ त्वमग्ने अयास्य
यासन्मनसा हितः॥ अयासन्हव्यमू[illegible]हिषे या नो धेहि भेषजं ४

मि ५

॥९॥

स्वाहा॥ अयसे अग्न[illegible] य इदं॥२१॥ यद्दीव्यन्नृणमहं बभूवादित्सन्वा
संजगर जनेभ्यः॥ अग्निर्मा तस्मादिंद्रश्च संविदानौ प्रमुंचतां स्वाहा॥ अ
ग्नींद्राग्निभ्यामिदं॥२२॥ यद्धस्ताभ्यां चकर किल्बिषाण्यक्षाणां वग्नुमु
पजिघ्नमानः॥ उग्रंपश्या च राष्ट्रभृच्च तान्यप्सरसावनुदत्तामृणानि
स्वाहा॥ उग्रंपश्यायै राष्ट्रभृते अप्सरोभ्यां चेदं॥२३॥ उग्रंपश्ये राष्ट्रभृत्कि
ल्बिषाणि यदक्षवृत्तमनु दत्तमेतत्॥ नेन्न ऋणानृणव इत्समानो य
मस्य लोके अधिरज्जुराय स्वाहा॥ उग्रंपश्यायै राष्ट्रभृते चेदं॥२४॥ अ
वते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः॥ क्षयन्नस्मभ्यमसु
र प्रचेतो राजन्नेनांसि शिश्रथः कृतानि स्वाहा॥ वरुणायेदं॥२५॥
उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमं श्रथाय॥ अथा वयमादि
त्य व्रते तवानागसो अदितये स्याम स्वाहा॥ वरुणायेदं॥२६॥ इमं मे

५

वरुणश्रुधीहवमद्याच मृडय॥ त्वामवस्युराचके स्वाहा॥ वरुणायेदं॥२७॥
तत्वायामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः॥ अहेडमानो
वरुणेहबोध्युरुशꣳस मान आयुः प्रमोषीः स्वाहा॥ वरुणायेदं॥२८॥ त्वं
नो अग्ने वरुणस्य विद्वान्देवस्य हेडो वयासिसीष्ठाः॥ यजिष्ठो वह्नितमः
शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत्स्वाहा॥ अग्नीवरुणाभ्या
मिदं॥२९॥ स त्वं नो अग्नेवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ॥ अवय
क्ष्व नो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो न एधि स्वाहा॥ अग्नी
वरुणाभ्यामिदं॥३०॥ संकुसुको विकुसुको निर्ऋथो यश्च निस्वनः॥
ते यस्मद्यक्ष्ममनागसो दूराद्दूरमचीचतꣳ स्वाहा॥ संकुसुकाय विकुसु
काय निर्ऋथाय निस्वनाय चेदं॥३१॥ निर्यक्ष्ममचीचते कृत्यां निर्ऋ
तिं च॥ तेन यो स्मत्समृच्छातै तमस्मै प्रसुवामसि स्वाहा॥ कृत्यायै निर्ऋ

२

त्यै चेदं॥३२॥ दुःशꣳसानुशꣳसाभ्यां घणेनानुघणेन च॥ तेनान्यो ऽस्म
त्समृच्छातै तमस्मै प्रसुवामसि स्वाहा॥ दुःशꣳसानुशꣳसाभ्यां घणायानु
घणाय चेदं॥३३॥ संवर्चसा पयसा संतनूभिरगन्महि मनसा सꣳशिवेन॥
त्वष्टा नो अत्र विदधातु रायो नु मार्ष्टु तन्वो यद्विलिष्टꣳ स्वाहा॥ त्वष्ट्र इदं॥३४॥
आपुष्टे विश्वतो दधदयमग्निर्वरेण्यः॥ पुनस्ते प्राण आयाति परा यक्ष्म
ꣳसुवामि ते स्वाहा॥ आयुर्धेग्नय इदं॥३५॥ आयुर्दा अग्ने हविषो जुषाणो
घृतप्रतीको घृतयोनिरेधि॥ घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि
रक्षतादिमꣳ स्वाहा॥ आयुर्दे ग्नय इदं॥३६॥ इममग्न आयुषे वर्चसे कृधि
प्रियꣳ रेतो वरुण सोम राजन्॥ मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जर
दष्टिर्यथासत्स्वाहा॥ अग्नये वरुणायादित्यै विश्वेभ्यो देवेभ्यश्चेदं॥३७॥
अग्न आयूꣳषि पवस आसुवोर्जमिषं च नः॥ आरे बाधस्व दुच्छुनाꣳ स्वाहा॥

६

अग्नये पवमानायेदं ॥३८॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं ॥ दधद्रयिं म
यि पोषं स्वाहा ॥ अग्नये पवमानायेदं ॥३९॥ अग्निरृषिः पवमानः पाञ्च
जन्यः पुरोहितः ॥ तमीमहे महागयं स्वाहा ॥ अग्नये पवमानायेदं ॥४०॥ अ
ग्ने जातान्प्रणुदा नः सपत्नान्प्रत्यजातान्जातवेदो नुदस्व ॥ अस्मे दीदिहि सु
मना अहेडन्छर्मंस्ते स्याम त्रिवरूथ उद्भौ स्वाहा ॥ अग्नये जातवेदस इदं ॥४१॥
सहसा जातान्प्रणुदा नः सपत्नान्प्रत्यजातान्जातवेदो नुदस्व ॥ अधि नो ब्रू
हि सुमनस्यमानो वयं स्याम प्रणुदा नः सपत्नान्स्वाहा ॥ जातवेदसे
इदं ॥४२॥ अग्ने यो नोभितो जनो वृको वारो जिघांसति ॥ तांस्त्वं वृत्रहं जे
हि वस्वस्मभ्यमाभर स्वाहा ॥ अग्नये वृत्रघ्न इदं ॥४३॥ अग्ने यो नो भिदा
सति समानो यश्च निष्ट्यः ॥ तं वयं समिधं कृत्वा तुभ्यमग्नेपि दध्मसि
स्वाहा ॥ अग्नय इदं ॥४४॥ यो नः शपादशपतो यश्च नः शपतः शपात् ॥

६

उषाश्च तस्मै निम्रुक्च सर्वं पापं समूहतां स्वाहा ॥ उषसे निम्रुचे चेदं ॥४५॥
यो नः सपत्नो योरणो मर्तोभिदासति देवाः ॥ इध्मस्येव प्रक्षायतो मा तस्यो
॥४६॥ च्छेषि किं चन स्वाहा ॥ देवेभ्य इदं ॥ यो मां द्वेष्टि जातवेदो यं चाहं द्वेष्मि य
श्च मां ॥ सर्वांस्तानग्ने संदह यांश्चाहं द्वेष्मि ये च मां स्वाहा ॥ जातवे
दसेग्नय इदं ॥४७॥ यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः ॥ निंदाद्यो
अस्मान्दिप्साच्च सर्वांस्तान्मषमषा कुरु स्वाहा ॥ अग्नय इदं ॥४८॥ सं
शितं मे ब्रह्म संशितं वीर्यं१ बलं ॥ संशितं क्षत्रं मे जिष्णुर्यस्याहमस्मि
पुरोहितः स्वाहा ॥ अग्नय इदं ॥४९॥ उदेषां बाहू अतिरमुद्वर्चो अथो बलं ॥
क्षिणोमि ब्रह्मणामित्रानुन्नयामि स्वां अहं स्वाहा ॥ ब्रह्मण इदं ॥५०
पुनर्मनः पुनरायुर्म आगात्पुनश्चक्षुः पुनः श्रोत्रं म आगात्पुनः प्राणः पु

७

नराकृतंमआगात्पुनश्चित्तंपुनराधीतंमआगात्॥ वैश्वानरोमेदब्धस्तनू
पाअवबाधतांदुरितानिविश्वास्वाहा॥ वैश्वानरायेदं॥५१॥ स्त्रि॰ देव्यो
घृउतयाप्टदाको त्विषिरश्वो श्रीमणेसूर्येया॥ इंद्रंयादेवीसुभगाजजा
नसानआगन्वर्चसासंविदानास्वाहा॥ त्विष्येदेव्याइदं॥५२॥ पाराजन्ये
दुंभीवायंतायामश्वस्यक्रंदेपुरुषस्यमायौ॥ इंद्रंयादेवीसुभगाजजाना
सानआगन्वर्चसासंविदानास्वाहा॥ त्विष्येदेव्याइदं॥५३॥ याहस्ति
निद्वीपिनीयाहिरण्येत्विषिरश्वेषुपुरुषेषुगोषु॥ इंद्रंयादेवीसुभगाज॰
नास्वाहा॥ त्विष्येदेव्याइदं॥५४॥ रथेअक्षेषुवृषभस्यवाजेवातेपर्जन्येव
रुणस्यशुष्मे॥ इंद्रंयादे॰वीसु॰नास्वाहा॥ त्विष्येदेव्याइदं॥५५॥ अग्ने
भ्यावर्तिन्नभिनआवर्तस्वायुषावर्चसासंन्यामेधयाप्रजयाधनेनस्वाहा॥

दुं ७

अग्नयेभ्यावर्तिनइदं॥५६॥ अग्नेअंगिरःशतंतेसंत्वावृतःसहस्रंतउ
पावृतः॥ तासांपोषस्यपोषेणपुनर्नोनष्टमाकृधिपुनर्नोरयिमाकृधि
स्वाहा॥ अग्नयेभ्यावर्तिनइदं॥५७॥ पुनरूर्जानिवर्तस्वपुनरग्नइषा
युषा॥ पुनर्नःपाहिविश्वतःस्वाहा॥ अग्नयेभ्यावर्तिनइदं॥५८॥ सहर
य्यानिवर्तस्वाग्नेपिन्वस्वधारया॥ विश्वप्स्न्याविश्वतस्परिस्वा
हा॥५९॥ अग्नयेभ्यावर्तिनइदं॥५९॥ ततोयजमानःसमित्पाणिः
स्वायतनेतिष्ठन्वैश्वानरायप्रतिवेदयामइतिद्वाभ्यांर्चेनोपतिष्ठते॥
वैश्वानरायप्रतिवेदयामोयदीनृणंसंगरोदेवतासु॥ सएतान्पा
शान्प्रमुचन्प्रवेदसनोमुंचातुदुरितादवद्यात्॥१॥ वैश्वानरःपवया
न्नःपवित्रैर्यत्संगरमभिधावाम्याशां॥ अनाजानन्मनसायाचमानो

८ यदत्रैनो अवतत्सुवामि ॥२॥ अमी ये सुभगो दिवि विचृतौ नाम तारके ॥ प्रेहा
मृतस्य यच्छतामेतद्बद्धकमोचनं ॥३॥ विजिहीष्व लोकान्कृधि बंधान्मु
चासि बद्धकं ॥ योनेरिव प्रच्युतो गर्भः सर्वान्पथो अनु ष्व ॥४॥ स प्रजानन्
प्रतिगृभ्णीत विद्वान्प्रजापतिः प्रथमजा ऋतस्य ॥ अस्माभिर्दत्तं जरसः
परस्तादछिन्नं तंतुमनु संचरेम ॥५॥ ततं तंतुमन्वेके अनुसंचरंति येषां तं ५
दत्तं पित्र्यमायनवत् ॥ अबंध्वेके ददतः प्रयच्छाद्दातुं चेच्छक्नुवांꣳसस्व
र्ग एषां ॥६॥ आरभेथामनुसंरभेथां समानं पंथामवथो घृतेन ॥
यद्वां पूर्तं परिविष्टं यदग्नौ तस्मै गोत्रायेह जायापती संरभेथां ॥७॥ यदं
तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिंसिम ॥ अग्निर्मा तस्मा ८
देनसो गार्हपत्यः प्रमुंचतु दुरिता यानि चकृम ॥८॥ भूमिर्माता दिति

र्नो जनित्रं भ्रातांतरिक्षमभिशस्त्या नः ॥ द्यौर्नः पिता पित्र्याच्छं भवासि
जामिमित्वा मा विविसि लोकान् ॥ यत्र सुहार्दः सुकृतो मदंते विहाय रो ॥९॥
गं तन्वः स्वायां ॥ अश्लोणा अंगैरहुताः स्वर्गे तत्र पश्येम पितरं च पुत्रं ॥१०॥
यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत वा करिष्यन् ॥ यद्देवानां च
क्षुष्यागो अस्ति यदेव किंच प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु ॥११॥
यदन्नमद्मि बहुधा विरूपं वासो हिरण्यमुत गामजामविं ॥ यद्देवानां
चक्षुष्यागो अस्ति यदेव किंच प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणो
तु ॥१२॥ तत्रैवोपविश्य ताꣳ समिधमादधाति ॥ यन्मया मनसा वा
वाचा कृतमेनः कदाचन ॥ सर्वस्मात्तस्मान्मेक्षितो मोग्धि त्वꣳहि वेत्थ
यथातथꣳ स्वाहा ॥ अग्नये वैश्वानराय इदं ॥ ततः आचार्याय वरं द
दाति ॥ गौर्वरो ब्राह्मणस्य ग्रामो राजन्यस्य अजा वैश्यस्येति पारस्क

९

मं

रः॥ सुवर्णगुंजामात्रमितिपैप्यः॥ ततः ईमंवरुणेत्यादि कर्मशेषं समा
पयेत्॥ एवं संवत्सराद्यन्यतमदीक्षांतं अग्न्यन्वाधानादिउत्तरपरिषेकां
तं प्रसहं कुर्यात्॥ दीक्षांतं व्रतं च कुर्यात्॥ अथ मे हनि अन्वाधानात्पूर्वं
होमांते वा व्रतसंकल्पः॥ ब्रह्मचारिकल्पेन॥ संवत्सराद्यन्यतरकाल
पर्यंतं दीक्षां करिष्यामि॥ राजन्यस्य यवागूः पयस्या ने॥ आमिक्षा वै
श्यस्य॥ क्षारं लवणं शामीधान्यं च वर्जयेत्॥ नोपरि शयीत॥ श्राद्धोच्छि
ष्टं न स्पृशेत्॥ दिवा न स्वपेत्॥ एवं सर्वं मनः संकल्पपूर्वकं कुर्यात्॥ प
योव्रताकरणसामर्थ्ये यवौदनं ब्राह्मणोनुव्रतयेत्॥ धाना राजन्यः॥
आमिक्षां वैश्यः॥ इति कूश्मांडहोमः॥ ॥ श्रीगणेशाय नमः॥ ॥ ॥
॥ अथ गणहोमः॥ तत्र सूत्रं बौधायनधर्मसूत्रे॥ ॥ पवित्रैः सहस्रा
क्षो मृगारांहोमुचौ गणौ पावमान्यश्च कूश्मांड्यो वैश्वानर्य ऋच

ही

श्च याः॥ १॥ घृतौदनेन जुहुयात्सप्ताहं सवनत्रयं॥ मौनव्रती हविष्या
शी निगृहीतो जितेंद्रियः॥ २॥ त्रिरह्नो मासाज्ञ पांपूर्णपात्रे वेक्ष्य च तुष्प
थे॥ मुच्यते सर्वपापेभ्यः पेसाम ऋग्यजुरथर्वणी॥ ३॥ कर्मभिर्यैरवाप्नो
ति क्षिप्रकामान्मनोगतान्॥ इति॥ ॥ शुक्लपक्षे पुण्यनक्षत्रे केशश्मश्रुन
खादि वापयित्वा स्नात्वाहते वाससी परिधायापरेणोपासनं दर्भे

ना

ष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य देशकालौ संकी
र्त्य मम अमुकशर्मणः सपत्नीकस्य सर्वपापक्षयार्थं श्री परमेश्वरप्री
त्यर्थं बौधायनोक्तं गणहोमं सवनत्रयं सप्ताहं करिष्ये इति संकल्प्य॥
एकाहं वा संकल्प्योत्तरं वापनं॥ सूत्रकृदाशय स्त्वग्रहसिद्धौदनेनैव
होमः यज्ञतंत्रादयस्तस्मिन्वाग्नौ चरुश्रपणमाहुः॥ अग्निमुपसमा
धायान्वाधानं॥ आइडए ही स्वादि प्राणायामांते [illegible] गणहोमकर्मणि

१०

देवतापरिग्रहार्थमित्यादि चक्षुषीआज्येनेसंतमुक्तात्रप्रधानंवैरोषि
कप्रधानंहोमे॰ सवितारं॰अग्निंप्रसूतारं॰पुरुषंनारायणंमष्टादशवारं॰
अग्निमंःहोमुचं॰अग्निमंःहोमुचं॰इंद्रमंःहोमुचं॰इंद्रमंःहोमुचं॰मि
त्रावरुणावागोमुचौ॰मित्रावरुणावागोमुचौ॰वायुसवितारावागो
मुचौ॰वायुसवितारावागोमुचौ॰अश्विनावागोमुचौ॰अश्विनावागो
मुचौ॰अश्विनावागोमुचौ॰मरुतएनोमुचः॰मरुतएनोमुचः॰वि
श्वांदेवानेनोमुचः॰विश्वान्देवानेनोमुचः॰अनुमतिं॰अनुमतिं॰अ
ग्निंवैश्वानरं॰अग्निंवैश्वानरं॰द्यावापृथिवीअंःहोमुचौ॰द्यावापृथि
वीअंःहोमुचौ॰अग्निं॰अग्निं॰इंद्रावरुणावंःहोमुचौ चतुः॰इंद्रावरु
णावश्वेस्वामं॰इंद्रावरुणौद्विपात्सुपशुषुस्वामं॰इंद्रावरुणौचतुष्पात्सु १०
पशुषुस्वामं॰इंद्रावरुणौगोष्ठेस्वामं॰इंद्रावरुणौगृहेषुस्वामं॰इंद्राव

रुणावप्सुस्वामं॰इंद्रावरुणावोषधीषुस्वामं॰इंद्रावरुणौवनस्पतिषुस्वा
मं॰पवमानंःस्वर्जनंपवित्रंविचर्षणिंपोतारं॰देवजनान्मनून्विश्वा
न्मनून्॰जातवेदसमग्निं॰अग्निं॰देवंःसवितारं॰वैश्वदेवीपुनती॰वैश्वा
नरंवातमिषिरंमयोभुवंद्यावापृथिव्यावृतावयौ॰सवितारंदेवमग्निं॰
ब्रह्माणं॰पावमानीःषट्॰ब्रह्माणं॰इंद्रंसुनीत्यासहितंसोमंस्वस्त्यासहि
तंवरुणंसमीच्यासहितंयमंराजानंप्रमृणाभिःसहितंजातवेदसमोर्जं
यंत्यासहितं॰देवानादित्यान्॰अग्निंगार्हपत्यं॰द्यावापृथिव्यौसरस्व
ती॰जातवेदसं॰अग्निंगार्हपत्यं॰दूरेपरस्याःराष्ट्रभृतं॰अग्निंगार्हपत्यं
द्विः॰अग्निं॰अग्निंगार्हपत्यंद्विः॰अग्निं॰अग्निंगार्हपत्यं॰अपःशुंधनीः॰
अपोहिरण्यवर्णाः॰वरुणंद्विः॰अग्नीवरुणौद्विः॰अग्निमयसं॰अग्निं
वैश्वानरमष्टवारंएतादेवताःघृतौदनेनयक्ष्ये॰वरुणंद्विराज्येनत्या

११

दि॰ अग्निं स्विष्टकृतं हुतौदनेन यक्ष्ये॰॥ पात्रासादनादि चरुश्रपणाद्याज्यभागांतं कृत्वा चरोः प्रभूतमाज्यमानीय स्रुवेण दर्व्यामुपस्तीर्य मेक्षणेन चरोर्हविरवदायाभिघार्य त्रिः पंचावत्तिनः॥ प्रत्यभिघार्य जुहोति॥ एवं प्रत्याहुति॰ॐ॥ अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान्॥ युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम स्वाहा॥ अग्नय इदं॥१॥ प्र वः शुक्राय भानवे भरध्वं हव्यं मतिं चाग्नये सुपूतं॥ यो दैव्यानि मानुषा जनूंषि अंतर्विश्वानि विद्मना जिगाति स्वाहा॥२॥ अग्नय इदं॥ अच्छा गिरो मतयो देवयंतीरग्निं यंति द्रविणं भिक्षमाणाः॥ सुसंदृशं सुप्रतीकं स्वंचं हव्यवाहमरतिं मानुषाणां स्वाहा॥ अग्नय इदं॥३॥ अग्ने त्वमस्मद्युयोध्यमीवा अनग्नित्रा अभ्यमंत कृष्टीः॥ पुनरस्मभ्यं सुवितायदेव क्ष्मां विश्वेभिरजरेभिर्यजत्र स्वाहा॥ अग्नय इदं॥४॥ अग्ने त्वं पारया नव्यो ११

अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा॥ पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः स्वाहा॥ अग्नय इदं॥५॥ प्रकारवो मननावच्यमाना देवद्रीचीं नयथ देवयंतः॥ दक्षिणावाड्वाजिनी प्राच्येति हविर्भरंत्यग्नये घृताची स्वाहा॥ अग्नय इदं॥६॥ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्॥ स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशांगुलं स्वाहा॥ पुरुषाय नारायणायेदं॥१॥ पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यं॥ उतामृतत्वस्येशानो यदन्नेनातिरोहति स्वाहा॥ पुरुषाय नारायणायेदं॥२॥ एतावानस्य महिमातो ज्यायांश्च पूरुषः॥ पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि स्वाहा॥३॥ पुरुषाय नारायणायेदं॥३॥ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवात्पुनः॥ ततो विष्वङ् व्यक्रामत्साशनानशने अभि स्वाहा॥ पुरुषाय नारायणायेदं॥४॥ तस्माद्विराडजायत विराजो अधि पूरुषः॥ स जातो अत्यरिच्यत

६ य

यणा १

१२ पश्चाद्भूमिमथोपुरः स्वाहा।पुरुषाय नारायणायेदं॥५॥यत्पुरुषेण हविषा
देवा यज्ञमतन्वत॥ वसंतो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः स्वाहा॥
पुरुषाय नारायणायेदं॥६॥सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृ
ताः॥देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुꣳ स्वाहा॥पुरुषाय नारा
यणायेदं॥७॥तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः॥ तेन देवा अ
यजंत साध्या ऋषयश्च ये स्वाहा॥पुरुषाय नारायणायेदं॥८॥तस्मा
द्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं॥पशूꣳस्ताꣳश्चक्रे वायव्यानारण्या
न्ग्राम्याश्च ये स्वाहा॥पुरुषाय नारायणायेदं॥९॥तस्माद्यज्ञात्स
र्वहुत ऋचः सामानि जज्ञिरे॥छंदाꣳसि जज्ञिरे तस्माद्यजुस्तस्मा १२

य
दजायत स्वाहा॥पुरुषाय नारायणायेदं॥१०॥तस्मादश्वा अजायंत ये के चो
भयादतः॥गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः स्वाहा॥पुरुषाय नारा
यणायेदं॥११॥यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्॥मुखं किमस्य कौ बा
हू का ऊरू पादा उच्येते स्वाहा॥पुरुषाय नारायणायेदं॥१२॥ब्राह्मणोस्य मु
खमासीद्बाहू राजन्यः कृतः॥ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रो अजायत स्वा
हा॥पुरुषाय नारायणायेदं॥१३॥चंद्रमा मनसो जातश्चक्षोः सूर्यो अ
जायत॥मुखादिंद्रश्चाग्निश्च प्राणाद्वायुरजायत स्वाहा॥पुरुषाय नारा
यणायेदं॥१४॥नाभ्या आसीदंतरिक्षꣳ शीर्ष्णो द्यौः समवर्तत॥पद्भ्यां भूमि
र्दिशः श्रोत्रात्तथा लोकाꣳ अकल्पयन् स्वाहा॥पुरुषाय नारायणायेदं॥१५॥
वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसस्तु पारे॥सर्वाणि रूपाणि
विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते स्वाहा॥पुरुषाय नाराय

१३ येदं ॥१६॥ धाता पुरस्ताद्यमुदाजहार शक्रः प्रविद्वान्प्रदिशश्चतस्रः ॥ तमे
तमेवं विद्वानमृत इह भवति नान्यः पंथा अयनाय विद्यते स्वाहा ॥ पुरुषा
य नारायणायेदं ॥१७॥ यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमा
न्यासन् ॥ ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः संति देवाः स्वाहा ॥ पु
रुषाय नारायणायेदं ॥१८॥ अग्नेर्मन्वे प्रथमस्य प्रचेतसः पांचज
न्यं बहवः समिंधते ॥ विश्वस्यां विशि प्रविविशिवांसमीमहे स नो मुं
चत्वंहसः स्वाहा ॥ अग्नयेंऽहोमुच इदं ॥१॥ यस्येदं प्राणन्निमिषद्यदेजति
यस्य जातं जनमानं च केवलं ॥ स्तौम्यग्निं नाथितो जोहवीमि स नो मुंच
त्वंहसः स्वाहा ॥ अग्नयेंऽहोमुच इदं ॥२॥ इंद्रस्य मन्ये प्रथमस्य प्रचेतसो
वृत्रघ्नः स्तोमा उप मामुपागुः ॥ यो दाशुषः सुकृतो हवमुपगंता स नो मुंच १३
त्वंहसः स्वाहा ॥ इंद्रायांऽहोमुच इदं ॥३॥ यः संग्रामं नयति संवशी यु

धेयः पुष्टानि संसृजति त्रयाणि ॥ स्तौमींद्रं नाथितो जोहवीमि स नो मुंच
त्वंहसः स्वाहा ॥ इंद्रायांऽहोमुच इदं ॥४॥ मन्वे वां मित्रावरुणा तस्य वित्तं
सचेतसौ द्रुह्वणो यौ नुदेथे ॥ या राजानं सरथं याथ उग्रा ता नो मुंच
तमागसः स्वाहा ॥ मित्रावरुणाभ्यामागोमुग्भ्यामिदं ॥५॥ यो वां र
थ ऋजुरश्मिः सत्यधर्मा मिथु चरंतमुपयाति दूषयन् ॥ स्तौमि मित्रावरु
मि णौ नाथितो जोहवीमि तौ नो मुंचतमागसः स्वाहा ॥ मित्रावरुणाभ्यामागो
मुग्भ्यामिदं ॥६॥ वायोः सवितुर्विदथानि मन्म[illegible]हे यावात्मन्वद्बिभृ
तो यौ च रक्षतः ॥ यो विश्वस्य परिभू बभूवतुस्तौ नो मुंचतमागसः स्वाहा ॥
वायुसवितृभ्यामागोमुग्भ्यामिदं ॥७॥ उप श्रेष्ठा न आशिषो देवयो
र्धर्मे अस्थिरन् ॥ स्तौमि वायुं सवितारं नाथितो जोहवीमि तौ नो मुं
चतमागसः स्वाहा ॥ वायुसवितृभ्यामागोमुग्भ्यामिदं ॥८॥ रथंत

१४ मोरथो नाम क्रतुतयेश्रुभंगमिष्ठोसुयमे भिरश्वैः ॥ यद्यो वंदि देवो देवेषु
निशित मोजस्तौ नो मुंचतमागसः स्वाहा ॥ अश्विभ्यामागोमुग्भ्यामि
दं ॥९॥ यद्यातं वहतुं सूर्यायास्त्रिचक्रेण संसदमिच्छमानौ ॥ स्तोमि दे
वावश्विनौ नाथितो जोहवीमि तौ नो मुंचतमागसः स्वाहा ॥ अश्वि
भ्यामागोमुग्भ्यामिदं ॥१०॥ मरुतां मन्वे अधि नो ब्रुवंतु प्रेमां वाचं
विश्वामवंतु विश्वे ॥ आशून्हुवे सुयमानूतये ते नो मुंचंत्वेनसस्वाहा ॥
मरुद्भ्य एनोमुग्भ्य इदं ॥११॥ तिग्ममायुधं वीडितं सहस्वद्दिव्यं शर्धः
पृतनासु जिष्णु ॥ स्तोमि देवान्मरुतो नाथितो जोहवीमि ते नो मुंचंत्वे
नसस्वाहा ॥ मरुद्भ्य एनोमुग्भ्य इदं ॥१२॥ देवानां मन्वे अधि नो ब्रु
वंतु प्रेमां वाचं विश्वामवंतु विश्वे ॥ आशून्हुवे सुयमानूतये ते नो
मुंचंत्वेनसस्वाहा ॥ विश्वेभ्यो देवेभ्य एनोमुग्भ्य इदं ॥१३॥ यदिदं १४

माभिशोचति पौरुषेयेण दैव्येन ॥ स्तोमि विश्वान्देवान्नाथितो जोहवीमि
ते नो मुंचंत्वेनसः स्वाहा ॥ विश्वेभ्यो देवेभ्य एनोमुग्भ्य इदं ॥१४॥ अनु नो
द्यानुमतिर्यज्ञं देवेषु मन्यतां ॥ अग्निश्च हव्यवाहनो भवतां दाशुषे मयः स्वा
४३ हा ॥ अनुमत्या इदं ॥१५॥ अन्विदनुमते त्वं मन्यासै शं च नः कृधि ॥ क्रत्वे
दक्षाय नो हिनु प्रण आयूंषि तारिषः स्वाहा ॥ अनुमत्या इदं ॥१६॥ वैश्वा
नरो न ऊत्या प्रयातु परावतः ॥ अग्निरुक्थेन वाहसा स्वाहा ॥ अग्नये
वैश्वानरायेदं ॥१७॥ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओ
षधीरा विवेश ॥ वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पा
तु नक्तं स्वाहा ॥ अग्नये वैश्वानरायेदं ॥१८॥ ये अग्नयः प्रथेतामभितेभिरो
जोभिर्ये प्रतिष्ठे अभवं तां वसूनां ॥ स्तोमि द्यावापृथिवी नाथितो जो
हवीमि ते नो मुंचतमंहसः स्वाहा ॥ द्यावापृथिवीभ्यामंहोमुग्भ्या

मिदं॥१९॥उर्वीरोदसीवरिवः कृणोतं क्षेत्रस्यपत्नीअधिनोब्रूयातं॥सो
मिद्यावापृथिवीनाथितोजोहवीमितेनोमुंचतमंहसः स्वाहा॥द्यावापृ
थिवीभ्यामंहोमुग्भ्यामिदं॥२०॥यत्तेवयंपुरुषत्रायविष्ठाविद्वांसश्च
कृमाकच्चनागः॥कृधीस्वस्मांअदितेरनागाव्येनांसिशिश्रथोविष्व
गग्नेस्वाहा॥अग्नयइदं॥२१॥यथाहत्तद्वसवोगौर्यंचित्पदिषितामंमुं
चतायजत्राः॥एवात्वमस्मत्प्रमुंचाव्यंहःप्रातार्यग्नेप्रतरांनआयुः
स्वाहा॥अग्नयइदं॥२२॥यावामिंद्रावरुणायतव्यातनूस्तयेममं
हसोमुंचतंस्वाहा॥इंद्रावरुणामंहोमुग्भ्यामिदं॥१॥योवामिंद्राव
रुणासहस्यातनूस्तयेममंहसोमुंचतंस्वाहा॥इंद्रावरुणाभ्यामं
होमुग्भ्यामिदं॥२॥यावामिंद्रावरुणारक्षस्यातनूस्तयेममंहसोमुं
चतंस्वाहा॥इंद्रावरुणामंहोमुग्भ्यामिदं॥३॥यावामिंद्रावरुणा

तेजस्यातनूस्तयेममंहसोमुंचतंस्वाहा॥इंद्रावरुणामंहोमुग्भ्यामि
दं॥४॥योवामिंद्रावरुणावग्नौस्त्रामस्तंवामेतेनावयजेस्वाहा॥इंद्राव
रुणाभ्यामग्नौस्त्रामायेदं॥योवामिंद्रावरुणाद्विपात्सुपशुषुस्त्रामस्तं
वामेतेनावयजेस्वाहा॥इंद्रावरुणाभ्यांद्विपात्सुपशुषुस्त्रामायेदं॥६॥
योवामिंद्रावरुणाचतुष्पात्सुपशुषुस्त्रामस्तंवामेतेनावयजेस्वाहा॥इं
द्रावरुणाचतुष्पात्सुपशुषुस्त्रामायेदं॥७॥योवामिंद्रावरुणागोष्ठेस्त्रा
मस्तंवामेतेनावयजेस्वाहा॥इंद्रावरुणाभ्यांगोष्ठेस्त्रामायेदं॥८॥यो
वामिंद्रावरुणागृहेषुस्त्रामस्तंवामेतेनावयजेस्वाहा॥इंद्रावरुणाभ्यां
गृहेषुस्त्रामायेदं॥९॥योवामिंद्रावरुणाप्सुस्त्रामस्तंवामेतेनावय
जेस्वाहा॥इंद्रावरुणाभ्यामप्सुस्त्रामायेदं॥१०॥योवामिंद्रावरुणोष
धीषुस्त्रामस्तंवामेतेनावयजेस्वाहा॥इंद्रावरुणाभ्यामोषधीषुस्त्रामा
येदं॥११॥योवामिंद्रावरुणावनस्पतिषुस्त्रामस्तंवामेतेनावयजेस्वा

१६

हा॥इंद्रावरुणाभ्यां वनस्पतिषु स्वामायेदं॥१२॥पवमानःसुवर्जनःपवित्रेण
विचर्षणिः॥यःपोतासपुनातुमा स्वाहा॥पवमानायसुवर्जनायपवित्राय
विचर्षणयेपोत्रेचेदं॥१॥पुनंतुमादेवजनाःपुनंतुमनवोधिया॥पुनंतु
विश्वआयवःस्वाहा॥देवजनेभ्योमनुभ्योविश्वायुभ्यश्चेदं॥२॥जात
वेदःपवित्रवत्पवित्रेणपुनाहिमा॥शुक्रेणदेवदीद्यदग्नेक्रत्वाक्रतूꣳर वृ ५
नुस्वाहा॥जातवेदसेग्नयइदं॥३॥यत्तेपवित्रमर्चिष्यग्नेविततमंतरा॥
ब्रह्मतेनपुनीमहेस्वाहा॥अग्नयइदं॥४॥उभाभ्यांदेवसवितःपवि
त्रेणसवेनच॥इदंब्रह्मपुनीमहेस्वाहा॥देवायसवित्रइदं॥५॥वै १६
श्वदेवीपुनतीदेव्यागाद्यस्यैबह्वीस्तनुवोवीतपृष्ठाः॥तयामदंतःस
धमाद्येषुवयꣳस्यामपतयोरयीणाꣳस्वाहा॥वैश्वदेव्यैपुनत्यैचेदं॥६॥
वैश्वानरोरश्मिभिर्मापुनातुवातःप्राणेनेषिरोमयोभूः॥द्यावापृथि

वीपयसापयोभिर्ऋतावरीयज्ञियेमापुनीताꣳस्वाहा॥वैश्वानरायवाता
येषिरायमयोभवेद्यावापृथिवीभ्यामृतावरीभ्यांचेदं॥७॥बृहद्भिःसवित
स्तृभिर्वर्षिष्ठैर्देवमन्मभिः॥अग्नेदक्षैःपुनाहिमा स्वाहा॥सवित्रेदेवायाग्न
येचेदं॥८॥येनदेवाअपुनतयेनापोदिव्यंकशः॥तेनदिव्येनब्रह्मणेदंब्रह्म
पुनीमहेस्वाहा॥ब्रह्मणइदं॥९॥यःपावमानीरध्येत्यृषिभिःसंभृतꣳर
सं॥सर्वꣳसपूतमश्नातिस्वदितंमातरिश्वना स्वाहा॥पावमानीभ्यइदं॥१०॥
पावमानीर्योअध्येत्यृषिभिःसंभृतꣳरसं॥तस्मैसरस्वतीदुहेक्षीरꣳसर्पि
र्मधूदकꣳस्वाहा॥पावमानीभ्यइदं॥११॥पावमानीस्वस्त्ययनीःसुदु
घाहिपयस्वतीः॥ऋषिभिःसंभृतोरसोब्राह्मणेष्वमृतꣳहितꣳस्वाहा॥पा
वमानीभ्यइदं॥१२॥पावमानीर्दिशंतुनइमंलोकमथोअमुं॥कामान्स
मर्धयंतुनोदेवीर्देवैःसमाभृता स्वाहा॥पावमानीभ्यइदं॥१३॥पावमा

१७ नीः स्वस्त्यमनीः सुदुघा हि घृतः श्चुतः ॥ ऋषिभिः संभृतो रसो ब्राह्मणेष्वमृतं
हितं स्वाहा ॥ पावमानीभ्य इदं ॥१४॥ येन देवाः पवित्रेणात्मानं पुनते स
दा ॥ तेन सहस्रधारेण पावमान्यः पुनंतु मा स्वाहा ॥ पावमानीभ्य इदं ॥१५॥
प्राजापत्यं पवित्रं शतोद्याम हिरण्मयं ॥ तेन ब्रह्मविदो वयं पूतं ब्रह्म पु नी ८
नीमहे स्वाहा ॥ ब्रह्मण इदं ॥१६॥ इंद्रः सुनीती सह मा पुनातु सोमः स्वस्त्या
वरुणः समीच्या ॥ यमो राजा प्रमृणाभिः पुनातु मा जातवेदा मोर्जयं
त्या पुनातु स्वाहा ॥ इंद्राय सुनीत्यास हिताय सोमाय स्वस्त्या सहिताय
वरुणाय समीच्या सहिताय यमाय राजे प्रमृणाभिः सहिताय जातवेदसे
ऊर्जयंत्या सहिताय इदं ॥१७॥ यद्देवा देवहेडनं देवासश्चकृमा वयं ॥ आदि १७
त्यास्तस्मान्मामुंचतर्तस्यर्तेन मामुत स्वाहा ॥ देवेभ्य आदित्येभ्य इदं ॥१॥
देवा जीवनकाम्या यद्वाचानृतमूदिम ॥ अग्निर्मा तस्मादेनसो गार्हप

सः प्रमुंचतु दुरिताद्यानि चकृम करोतु मामनेनसं स्वाहा ॥ अग्नये गार्हप
त्याय इदं ॥२॥ ऋतेन द्यावापृथिवी ऋतेन त्वं सरस्वति ॥ ऋता मामुंचतांह
सो यदन्यकृतमारिम स्वाहा ॥ द्यावापृथिवीभ्यां सरस्वत्या इदं ॥३॥ स
जातशंसादुत वा जामिशंसाज्ज्यायसः शंसादुत वा कनीयसः ॥ अना
ज्ञातं देवकृतं यदेनस्तस्मात्त्वमस्मान् जातवेदो मुमुग्धि स्वाहा ॥ जातवेदस
इदं ॥४॥ यद्वाचा यन्मनसा बाहुभ्यामूरुभ्यामष्ठीवद्भ्यां शिश्नैर्यदनृ
तं चकृमा वयं ॥ अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंचतु दुरिता० सं
स्वाहा ॥ अग्नये गार्हपत्याय इदं ॥५॥ यद्धस्ताभ्यां चकर किल्बिषाण्यक्षा
णां वग्नुमुपजिघ्नमानः ॥ दूरेपश्या च राष्ट्रभृच्च तान्यप्सरसावनुद
त्तामृणानि स्वाहा ॥ दूरेपश्याराष्ट्रभृद्भ्यामप्सरोभ्य इदं ॥६॥ अदीव्यन्नृ ८
णं यदहं चकार यद्वादास्यं संजगारा जनेभ्यः ॥ अग्निर्मा तस्मादेनसो

यद्दीव्यं न्नृणमहं बहुवा कितव अ... जगारा जनेभ्यः ।

१८

गार्हपत्यः प्रमुंचतु दुरितायानि० नसुः स्वाहा ॥ अग्नये गार्हपत्यायेदं ॥ ७ ॥
यन्मे पिमाता गर्भे सत्येनश्च कारयश्चिता ॥ अग्निर्मा तस्मादेनसो गार्हप
त्यः प्रमुंचतु दुरितायानि० नसुः स्वाहा ॥ अग्नये गार्हपत्यायेदं ॥ ८ ॥ यदा
पिपेष मातरं पितरं पुत्रः प्रमुदितो धयन् ॥ अहिंसितौ पितरौ मया त
तदग्ने अनृणो भवामि स्वाहा ॥ अग्नय इदं ॥ ९ ॥ यदंतरिक्षं पृथिवीमु
त द्यां यन्मातरं पितरं वाजिहिंसिम ॥ अग्निर्मा तस्मादेनसो गार्हपत्यः
प्रमुं० नसुः स्वाहा ॥ अग्नये गार्हपत्यायेदं ॥ १० ॥ यदाशसा निशसा भि
संशसा यदेनश्चकमानूतनं यत्पुराणं ॥ अग्निर्मा तस्मादेनसो गार्ह
पत्यः प्रमुंचतु दुरितायानि० नसुः स्वाहा ॥ अग्नये गार्हपत्यायेदं ॥ ११ ॥ अ
तिक्रामामि दुरितं यदेनो जहामि रिप्रं परमे सधस्थे ॥ यत्र यंति सुकृ
तो नापि दुष्कृतस्तमारोहामि सुकृतानु लोकं स्वाहा ॥ अग्नय इदं ॥ १२

१८

त्रितेदेवा अमृजतैतदेनस्त्रित एतन्मनुष्येषु मामृजे ॥ ततो मा यदि किंचि
दानशेग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंचतु दुरितायानि० नसुः स्वाहा ॥
॥१३॥ अग्नये गार्हपत्यायेदं ॥ दिविजाता अप्सुजाता या जाता ओषधीभ्यः ॥ अथो
या अग्निजा आपः स्ता नः शुंधंतु शुंधनीः स्वाहा ॥ अभ्यः शुंधनीभ्य इदं ॥ १४ ॥
यदापो नक्तं दुरितं चराम यद्वा दिवा नूतनं यत्पुराणं ॥ हिरण्यवर्णास्त
त उत्पुनीत नः स्वाहा ॥ अद्भ्यो हिरण्यवर्णाभ्य इदं ॥ १५ ॥ इमं मे वरुण श्रुधी
हवमद्या च मृडय ॥ त्वामवस्युरा चके स्वाहा ॥ वरुणायेदं ॥ १६ ॥ तत्त्वा या
मि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेडमानो वरुणे
ह बोध्युरुशंस मा न आयुः प्रमोषीः स्वाहा ॥ वरुणायेदं ॥ १७ ॥ त्वन्नो अग्ने
वरुणस्य विद्वान्देवस्य हेडो वयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो
विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्स्वाहा ॥ अग्नीवरुणाभ्यामिदं ॥ १८ ॥ स

१९ त्वंनोअग्नेवमोभवो तीनेदिष्ठो अस्याउषसोव्युष्टौ॥अवयक्ष्वनोवरुणं
रराणोवीहिमृडीकंसुहवोमएधिस्वाहा॥अग्नीवरुणाभ्यामिदं॥इममा
सहोमः॥वैश्वानरोनऊत्याप्रयातुपरावतः॥अग्निरुक्थेनवाहसास्वाहा॥
अग्नयेवैश्वानरायेदं॥१॥ऋतावानंवैश्वानरमृतस्यज्योतिषस्पतिं॥अ
जस्रंघर्ममीमहेस्वाहा॥अग्नयेवैश्वानरायेदं॥२॥वैश्वानरस्यदंससना
भ्योबृहदरिणादेकःस्वपस्ययाकविः॥उभापितरामहयंनजायताग्निर्द्या
ये४ वापृथिवीभूरिरेतसास्वाहा॥अग्नेवैश्वानरायेदं॥३॥पृष्टोदिविपृष्टोअ
ग्निःपृथिव्यांपृष्टोविश्वाओषधीराविवेश॥वैश्वानरःसहसापृष्टोअ
ग्निःसनोदिवासरिषःपातुनक्तंस्वाहा॥अग्नयेवैश्वानरायेदं॥४॥जा
तोयदग्नेभुवनाव्यख्यःपशुंनगोपाइर्यःपरिज्मा॥वैश्वानरब्रह्मणविंद १९
गातुंयूयंपातस्वस्तिभिःसदानःस्वाहा॥अग्नयेवैश्वानरायेदं॥५॥त्व

मग्नेशोचिषाशोशुचानआरोदसीअपृणाजायमानः॥त्वंदेवांअभिशस्ते
रमुंचोवैश्वानरजातवेदोमहित्वास्वाहा॥अग्नयेवैश्वानरायेदं॥६॥अस्मा
कमग्नेमघवत्सुधारयानामिक्षत्रमजरंसुवीर्यं॥वयंजयेमशतिनंस
हस्रिणंवैश्वानरवाजमग्नेतवोतिभिःस्वाहा॥अग्नयेवैश्वानरायेदं॥७॥
वैश्वानरस्यसुमतौस्यामराजाहिकंभुवनानामभिश्रीः॥इतोजातोवि
श्वमिदंविचष्टेवैश्वानरोयततसूर्येणस्वाहा॥अग्नयेवैश्वानरायेदं॥८॥
एताभ्युरुत्तरंशतमाहुतीरवदानधर्मेणघृतोदनाद्गुत्वावरंदत्वाव्या
हृतिभिरुपहोमंकृत्वा॥स्विष्टकृतंकृत्वा॥हव्यवाहमभिमातिषाहंर
क्षोहणंपृतनासुजिष्णुं॥ज्योतिष्मंतंदीद्यतंपुरंधिमग्निंस्विष्टकृतमा
हुवेमोम॥स्विष्टमग्नेअभितत्पृणाहिविश्वादेवपृतनाअभिष्य॥उरुं
नःपंथांप्रदिशंविभाहिज्योतिष्मद्धेह्यजरंनआयुःस्वाहा॥अग्नयेस्वि

२०

ष्कृतइदं॥अथासादितमुदपात्रमादायनिर्ऋतौदिशंगत्वाचतुष्पथेगो
मयेनोपलिप्योपविश्योदपात्रंपुरोनिधायतस्मिनात्मनःप्राङ्मुखस्य
सपत्नीकस्यप्रतिबिंबमवेक्षेतानुवाकंवाक्यन्त्राःपठन्॥ ॥छ॥॥
सिंहेमेमन्युः॥व्याघ्रेमेंतरामयः॥वृकेमेक्षुत्॥अश्वेमेघासिः॥धन्वनी
मेपिपासा॥राजगृहेमेशनया॥अश्मनिमेतंद्रिः॥गर्दभेमेनिद्राः॥शाल्य
केमेह्रीः॥अश्वत्थेमेवेपथुः॥कूर्मेमेंगरोगः॥वस्तेमेपसर्प्या॥अप्रिये
मेमृत्युः॥भ्रातृव्येमेपाप्मा॥सपत्नेमेनिर्ऋतिः॥दुष्कृतौमेवृद्धिः॥प
रस्वतीमेलम्टद्धिः॥खड्गेमआर्तिः॥गवयेमआंध्यं॥गौरेमेबाधिर्यं॥ऋ
क्षेमेशोकः॥गोधायांमेस्वेदः॥जरायांमेहिमः॥कृष्णशकुनौमे।भीरु
ता॥करोमेपापोगंधः॥उलूकेमश्वभ्यन्त्राः॥क्रोकेमइर्ष्या॥मर्कटमेदुर्ऋ
द्धिः॥कुललेममंस्या॥उललेमेप्रज्ञा॥उष्ट्रेमेतृष्णा॥ऋश्येमेश्रमः॥ २०